'स्यसिच्सीयुट्[1]तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' (६.४.६२/२७५७)। कारिषीष्ट। हारिषीष्ट[2]। [3]आर्धधातुके इति किम्? क्रियेत। ह्रियेत। यगन्तस्याजन्तत्वाच् चिण्वद्भावे सति वृद्धिः स्यात्, ततश्च युक् प्रसज्येत।

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम्।
आल्लोप ईत्वमेत्वं च चिण्वद्भावश्च सीयुटि (म.भा. ३.१९८)॥

## भ्रस्जो रोपधयो रमन्यतरस्याम्। (४७/२८३७)

भ्रस्जो रेफस्य उपधायाश्च रम् अन्यतरस्यां भवति। रोपधयोः इति [4]स्थानषष्ठीनिर्देशात् उपधा रेफश्च निवर्तेते। मित्त्वाच्चायम् अचोऽन्त्यात्परो भवति। भ्रष्टा, भर्ष्टा। भ्रष्टुम्, भर्ष्टुम्। भ्रष्टव्यम्, भर्ष्टव्यम्। भ्रज्जनम्, भर्जनम्। भृष्टः, भृष्टवान् इत्यत्र पूर्वविप्रतिषेधेन सम्प्रसारणं भवति। उपदेशे इत्येव, बरीभृज्यते॥

## अतो लोपः। (४८/२३०८)

अकारान्तस्य[5] आर्धधातुके[6] लोपो भवति। चिकीर्षिता। चिकीर्षितुम्। चिकीर्षितव्यम्[7]। [8]धिनुतः। कृणुतः। अतः इति किम्? चेता। स्तोता। तपरकरणं किम्? याता। वाता। आर्धधातुके इति किम्? वृक्षत्वम्[9]। [10]वृक्षता। वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन (म.भा. ३.२००)। चिकीर्षकः। जिहीर्षकः। चिकीर्ष्यते। जिहीर्ष्यते॥

## यस्य हलः। (४९/२६३१)

हल उत्तरस्य यशब्दस्य आर्धधातुके[11] लोपो भवति। [12]बेभिदिता। बेभिदितुम्। बेभिदितव्यम्। यस्य इति सङ्घातग्रहणमेतत्। तत्र 'अलोऽन्त्यस्य' (१.१.५२/४२) इत्येतन्न भवति, 'अतो लोपः' (६.४.४८/२३०८) इत्यनेनैव [13]तस्य सिद्धत्वात्। हलः [14]इति वा पञ्चमीनिर्देशः, तत्र 'आदेः परस्य' (१.१.५४/४४) इति यकारो[15]ऽनेन लुप्यते। सङ्घातग्रहणं किम्? ईर्ष्यिता। मव्यिता। हलः इति किम्? लोलूयिता। पोपूयिता॥

## क्यस्य विभाषा। (५०/२६६०)

क्यस्य हल उत्तरस्य विभाषा लोपो भवति आर्धधातुके। समिध्यिता, समिधिता। दृषद्यिता, दृषदिता। समिधमा[17]त्मनः इच्छति, समिधम् इव [18]आत्मानम् आचरति इति वा क्यच्क्यङौ यथायोगं कर्तव्यौ॥

## णेरनिटि। (५१/२३१३)

अनिडादावार्धधातुके[19] णेर्लोपो भवति। इयङ्यण्गुणवृद्धिदीर्घाणामपवादः। अततक्षत्। [20]अररक्षत्। [21]आशिशत्। आटिटत्। कारणा। हारणा। कारकः। [22]हारकः। कार्यते। [23]हार्यते। ज्ञीप्सति। अनिटि इति किम्? कारयिता। हारयिता॥

---

1. तासिषु -- इट् च नास्ति फ. 2. कृषीष्ट इत्यधिकम् फ.ह. 3. आर्धधातुके-स्नायात् नास्ति क. 4. षष्ठीनिर्देशात् क.ह. 5. अङ्गस्य इत्यधिकम् क.ड.फ.ह. 6. परतः इत्यधिकम् फ. ह. 7. जिहीर्षिता जिहीर्षितुम् जिहीर्षितव्यम् इत्यधिकम् ड. 8. धिनुतः नास्ति क. 9. प्लक्षत्वम् इत्यधिकम् ह. 10. नास्ति क, प्लक्षता इत्यधिकम् ह. 11. परतः इत्यधिकम् फ. 12. बिभिदिका ह. 13. तस्य नास्ति फ.ह. 14. इति वा नास्ति फ, वा नास्ति क. 15. अनेन नास्ति फ. ह. 16. परतः इत्यधिकम् फ. ह. 17. आत्मानम् क. 18. आत्मानम् नास्ति क. 19. परतः इत्यधिकम् फ.ह. 20. नास्ति क. 21–22. नास्ति फ. 23. नास्ति ब.